----------------------------------------------------------------------------------------------------

[ MODEL QUESTION PAPER]

SSLC EXAMINATION, MARCH 2022

**SANSKRIT**

First language [Academic& Oriental] Paper I

Time.1.30 hrs **Total Score**. 40

----------------------------------------------------------------------------------------------------

निर्देशाः

आदौ विंशति निमेषाः समाश्वाससमयः।

प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च समयोऽयम् उपयोक्तव्यः।

प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगत्य च उत्तराणि लेखनीयानि।

प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः। उत्तरलेखनाय अङ्काः समयश्च परिगणनीयाः।

----------------------------------------------------------------------------------------------------

**Part-I**

**A 1-6 यथेच्छं चतुर्णां प्रश्नानाम् उत्तरं कोष्ठकात् चित्वा लिखत ।** (4X1=4)

1. आरोग्यं केषु श्रेष्ठं भवति ?

( कृतकृत्येषु, लाभेषु , सुखेषु , धनेषु )

2. '*दीनवत्सला जननी* ' इति कथायां प्रतिपादितः विषयः कः ?

(दीनानुकम्पा , परोपकारः , मातृस्नेहः )

3.'एति' इति पदस्य लकारः कः ?

( लोट् ,लङ् ,लट् )

4.'गान्धर्वविद्या' इति नामान्तरेण प्रसिद्धं शास्त्रं किम् ?

(नाट्यम्, सङ्गीतम् , ज्योतिषम् )

5. क्रिस्तुभागवतस्य कर्ता कः ?

( पि सि देवस्य , फा.जोण् कुन्नप्पल्लि, अक्कित्तम् )

6.अधोदत्तेषु फलपाकान्तः सस्यविशेषः कः?

( कदली , पनसः , आम्रः)

**B 7-9 अधोलिखितानां त्रयाणां प्रश्नानाम् उत्तरं लिखत ।** (3X1= 3)

7. **संबोधन पदं चित्वा लिखत ?**

हे शिष्य ! भवान् गत्वा भिक्षां स्वीकुरु ।

8. उदाहरणानुसारं पदच्छेदं लिखत ?

यथाः- सहैव = सह + एव

ममैव =...........+.............

9. अन्यं वैद्यं वैद्यान्तरं एवं चेत् **अन्यत् राज्यं**..........................

----------------------------------------------------------------------------------------------------

---

## Part II

**A. 10 अधोलिखितस्य प्रश्नस्य उत्तरं लिखत ।** (1X2 = 2)

10. 'सुखदुःखयोः कर्ता आत्मानमेव ' इत्यर्थप्रतिपादकं श्लोकं चित्वा लिखत।

१. आत्मानमेव मन्येत कर्तारं सुखदुःखयोः ।
तस्माच्छ्रेयस्करं मार्गं प्रतिपद्येत न त्रसेत् ।।

२. ईर्ष्याभयक्रोधसमन्वितेन, लुब्धेन रुग्दैन्यनिपीडितेन ।
विद्वेषयुक्तेन च सेव्यमानम् ,अन्नं न सम्यक् परिपाकमेति ।।

B. 11-12 **प्रश्नद्वयेषु कस्यापि एकस्य प्रश्नस्य उत्तरं लिखत।** (1X2 = 2)

11. उदाहरणानुसारं वाक्यं परिवर्तयत।

**उदा** - वर्षाकालः आगतः । चण्डवातः आसीत् ।
यदा वर्षाकालः आगतः तदा चण्डवातः आसीत् ।

१. कमलं विकसति । भ्रमराः आगच्छन्ति ।

12. श्लोकं पठित्वा सूचनानुसारं गद्यक्रमं लिखत ।

एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वति ।।

..........................एवं वादिनि............पार्श्वे ....................अधोमुखी ।...................... गणयामास ।

## Part-III

**A. 13-16 यथेच्छं त्रयाणाम् उत्तरं लिखत ।** (3X3=9)

13. उदाहरणानुसारं पट्टिकां रचयत ।

| **कर्ता** | **कृतिः** | **स्त्रीकथापात्रम्** |
|---|---|---|
| कालिदासः | कुमारसंभवम् | पार्वती |
| माघः | ........................ | भटपत्नी |
| ...................... | किरातार्जुनीयम् | द्रौपदी |
| श्रीहर्षः | नैषधीयचरितम् | ................................ |

---

14. अधोदत्तवाक्यात् क्त्वान्त-ल्यबन्त तुमुन्नन्तानि चित्वा लिखत।

स्वपुरमागतं नचिकेतसं सत्कर्तुम् असमर्थः यमः

तमुपगम्य वरत्रयं दत्वा तेन सह संवादमकरोत् ।

15. उदाहरणानुसारं कोष्ठकात् क्रियापदानि स्वीकृत्य पट्टिकां पूरयत ।

(पिबति ,अलिखत् ,नयतु ,करोति ,अवसत् ,गच्छतु)

| **लट्** | **लङ्** | **लोट्** |
|---|---|---|
| करोति | अवसत् | नयतु |
| | | |

16. पेटिकातः समानार्थकपदानि स्वीकृत्य पूरयत ।

1. अतिवृष्टिः ...................
2. मार्गः ....................
3. कष्टेन .....................

| |
|---|
| कृच्छ्रेण |
| प्रवर्षः |
| पन्था |

**B. 17 अधोलिखितस्य प्रश्नस्य उत्तरं लिखत ।** (1X 3 = 3)

17. अधोदत्तानां सस्यानाम् औषधगुणाः लिखत।

1. हरिद्रा ....................
2. तुलसी ....................
3. निम्बः ....................

## Part IV

**A.18-20 द्वयोः प्रश्नयोः उत्तरं लिखत ।** (2X4= 8)

18. **सूचनानुसारं वृक्षप्रभेदमधिकृत्य लघूपन्यासं लिखत ।**

सूचना: → दशपुत्रसमः-वनस्पतिः- ओषधिः-चतुर्धा-अव्यक्तपुष्पः-पनसः-व्रीहिः

19. **गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

संस्कृतवाङ्मये अष्टोत्तरशताधिकाः उपनिषदः सन्ति। तासु दशोपनिषदः प्रमुखाः।एतासु उपनिषत्सु अतीव सुन्दरमस्ति कठोपनिषद् इति स्वामि विवेकानन्दस्य अभिप्रायः।यम-नचिकेतसोः संवादरूपेण भवति अस्याः

-----------------------------------------------------------------------------------------------------

रचना। वैशम्पायनमहर्षेः शिष्येण कठेन विरचित त्वाद् कठोपनिषद् इति नाम सिद्धम्। अस्याम् उपनिषदि आत्मविद्यायाः श्रेष्ठता प्रतिपा द्यते। स्वामि विवेकानन्दस्य उद्बोधनेषु दृश्यमाना "उत्तिष्ठत! जाग्रत! प्राप्यवरान्निबोधत" इति सुप्रसिद्धा सूक्तिः कठोपनिषदः उद्धृता भवति।

1. कति उपनिषदः सन्ति ?
2. कथम् अस्याः कठोपनिषद् इति नाम सिद्धम् ।
3. कठोपनिषदि प्रतिपादितः विषयः कः ?
4. कठोपनिषदः स्वामि विवेकानन्देन उद्धृता सूक्तिः का ?

20 सूचनानुसारं जीवनचरितं लिखत।

नाम - मौलाना अब्दुल्कलाम् आसादः ।

जन्म- सौदि अरेब्यायां मेक्का देशे 1888 नवम्बर् ।।

कर्ममण्डलं- भारतस्य प्रथमशिक्षामन्त्री, ग्रन्थकारः, स्वतन्त्रतासंग्रामप्रवर्तकः।

पुरस्कार- 'भारतरत्न' पुरस्कारः (1992 तमे वर्षे मरणानन्तर बहुमतिः)

सविशेषता- अस्य जन्मदिनम् देशीयशिक्षादिनत्वेन आचरति ।

देहवियोगः- 1958 फेब्रुवरी मासे 22 दिनाङ्के।

B. 21-22 **प्रश्नद्वयेषु कस्यापि एकस्य प्रश्नस्य उत्तरं लिखत।** (1X4 = 4)

21. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

इमामहं वेद न तावकीं धियं विचित्ररूपा खलु चित्तवृत्तयः।
विचिन्तयन्त्या भवदापदं परां रुजन्ति चेतः प्रसभं ममाधयः।

(क) श्लोकमिदं कस्मिन् काव्ये अन्तर्भवति ?

(ख) अस्य श्लोकस्य वक्ता का ?

(ग) श्लोकात् क्रियापदं चित्वा लिखत ।

(घ) के चेतः रुजन्ति ?

22. अधोदत्तां खण्डिकां पठित्वा सम्भाषणांशान् पूरयत ।

एकदा गुरुकुले वसन् श्रीशङ्करः भिक्षार्थं सतीर्थ्यैः सह एकं ब्राह्मणगृहं प्राप्तवान्। अम्ब! भिक्षां देहि इति शब्दं श्रुत्वा बहिरागता ब्राह्मणपत्नी दीनवचसा 'भिक्षां दातुं किमपि नास्ति, केवलम् शुष्कमेकम्

-----------------------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------------

आमलकमेवास्ति इति अवदत् । भवति! यत्किमपि दीयताम् ' इति तस्य वचनम् अनुसृत्य कुटुम्बिनी शुष्कम् तद् आमलकम् आनयत् । बाल! इदं स्वीकरोतु' इत्युक्त्वा तत् शङ्कराय अदात् च ।

शङ्करः - अम्ब !..............................

कुटुम्बिनी - अत्र भिक्षां दातुं किमपि नास्ति, केवलम् शुष्कमेकम् आमलकमेवास्ति ।

शङ्करः - भवति! .......................दीयताम् ।

कुटुम्बिनी - .........................स्वीकरोतु ।

शङ्करः - ........................।

## Part V

**23-24 प्रश्नद्वयेषु कस्यापि एकस्य प्रश्नस्य उत्तरं लिखत।** (1X5 =5)

23. प्रादेशिकभाषया लिखत।

पौराणिक भारतीयाः प्रकृतिसंरक्षणे श्रद्धालवः आसन्। सस्यानां वैविध्यं तेषाम् औषधगुणांश्चाधिकृत्य ते बहून् ग्रन्थान् रचितवन्तः। विविधानां सस्यानां परि पालनविधयः ते सम्यक् ज्ञातवन्तः। प्रकृतिसंरक्षणाय प्रथमं वृक्षसंरक्षणम् अनिवार्यं भवति। 'दशपुत्रसमो द्रुमः' इत्युक्तिः प्रसिद्धा खलु।

24 कविकुलगुरोः कालिदासस्य कुमारसम्भवम् रघुवंशम्, माघस्य शिशुपाल वधम् भारवेः किरातार्जुनीयम् श्रीहर्षस्य नैषधीयचरितम् इत्येतानि भवन्ति पञ्च महाकाव्यानि। एषु महाकाव्येषु सौन्दर्यस्य तथा शक्तेः प्रतिरूपेणैव महिलाः वर्णिताः। पार्वतीपरमेश्वरयोः विवाहपर्यन्ता कथा एव कालिदासकृत कुमारसम्भवस्यप्रतिपाद्यः। सूर्यवंशजातात् दिलीपादेव रघुवंशकथा प्रारभ्यते। पञ्चमहाकाव्येषु बारवेः किरातार्जुनीयम् अर्थगौरवेण सविषेषं स्थानमावहति।

----------------------